ललितापूजानविधिः

नं० १२६५

#5725

F-15

Complete

नं० २२४ २२७

१ ॐ श्रीगणेशाय नमः ब्रह्मविष्णुशिवाराध्यमवाङ्मनसगोचरं । गुरुषं तमहं वंदे कर्त्तारं नामरूपयोः १
प्रणम्य परमां शक्तिं महागणपतिं गुरुं । तंत्रसारानुसारेण लिखिष्ये पूजनक्रमं २ दृष्ट्वा कादिमतं सर्वं
आम्नातस्य मनोरमां संप्रदायानुरोधेन विलिखिष्ये यथामति ३ तत्र यथाविधि गुरोर्विद्यां लब्ध्वाभ्र
भिषेकं पूर्णाभिषेकं च लब्ध्वा देवीमुपासीत यथा अपररात्रे प्रबुद्धो देवीरूपमात्मानं ध्यात्वा तन्म
यं गुरुं च ध्यात्वा गुरुं स्तुवीत ॐ नमस्तेनाथ भगवन् शिवाय गुरुरूपिणे विद्यावतारसंसिध्यै स्वीकृ
तानेकविग्रह १ नवाय नवरूपाय परमार्थैकरूपिणे सर्वाज्ञानतमोभेदभानवे चिद्घनाय ते २ स्व
तंत्राय दयाक्लृप्तविग्रहाय शिवात्मने परतंत्राय भक्तानां भव्यानां भव्यरूपिणे ३ विवेकीनां विवेका
य विमर्शाय विमर्शिनां प्रकाशाय प्रकाशानां ज्ञानिनां ज्ञानरूपिणे ४ पुरस्तात्पार्श्वयोः पृष्ठे नमस्कु
र्यादुपर्यधः सदा मच्चित्तरूपेण विधेहि भवदासनं ५ इति एतत्फलमपि तत्रैव स्तुवीत पंचभिः श्लो
कैस्तन्नित्यं सर्वसिद्धये ६ प्रातः प्रबोधसमये रूपात्कृदिवसं भवेत् ततो वहन्नाडीपदपुरस्सरं गत्वा
यथावश्यकं निर्वृत्य स्नात्वा संध्यादि यथोपास्य प्रातः संध्यायां नववारं मध्याह्ने षट्त्रिंशद्वारं सायं षोड
शवारं जपित्वा तर्पणं सूर्यार्घं द्वारपूजां वास्तुपूजां आसनोपवेशनं गुरुवंदनं भूतशुद्ध्यादि प्राग्वद्या
गोक्तमातृकान्यासं स्वेच्छया शरीरशुध्यर्थं फलार्थं कांश्चिन्मातृकान्यासानिहानुक्तानपि कुर्यात्
न त्वेतदंगत्वेन तत्क्रमस्त्वेवैकादशमातृकायाः षडंगमातृकान्यासमेव सर्वासां प्रथमं कृत्वा पश्चा

नेत्रोदितं न्यसेत् ललितायास्तु वर्गैस्तु प्रोक्तमष्टाभिरेव तु तेन तस्यास्तु लिपिणेन्यासो नैव
समाचरितमिति शास्त्रसिद्धिकामश्चैत्यं च विंशपटलोक्तमातृकाविद्याभिः सार्द्धं मातृकास्थाने
षु दिननित्यासहितां श्रीविद्यां न्यसेत् तादात्म्यता भवति दिननित्यास्तु तंत्रोक्ताः शुक्लादिदिनमार
भ्य प्रतिदिनमेकैकगणनाप्ताः यथा अआइईइति शुक्लप्रथानदिने एवं वर्त्तमानदिनांतं षट्त्रिंश
त्तुत्तरसप्तशताधिकविंशतिसहस्रप्रतिदिवसैकैकैकई देन नित्या अहर्गणप्राप्ताः तिथिनित्यास्तु
प्रतिपत्तिथिमारभ्य पंचदशपंतमंबिके कामेश्वर्यादिचित्रांता देव्यस्त्वेकैकविग्रहाः यतस्ततः
स्वस्वतिथौ तास्ताः पूज्याङ्गतादिभिरिति ततः पूजासाधनानि उपकल्प्य शुचिर्भूत्वा रक्ताम्बरधरः
स्वर्णस्रग्विस्रवीवारलभूषादियुतः कर्पूरवासितमुखपरिधानवस्त्रः सर्वांगसमाहितमनाः
प्राङ्मुख उदङ्मुख ईशानमुखो वा पद्मासनेनोपविशेत् तत्पूजनांगत्वेनैव ऊर्ध्वोपरिन्यसेद्यस्यासा
त्वादेयास्तले बाह्यपार्श्वे हृदयस्पर्शात्पद्मासनमुद्दीरितमिति ततः प्राणायामाः यथा वामना
सया यथाविधि यथाशक्ति वायुमापूर्य दक्षिणयापसार्य पुनर्दक्षिणया वायुमापूर्य वाम
यानिर्गमय्य पुनर्वामया द्वात्रिंशन्मात्रयाकृष्य चतुःषष्टिमात्राभिर्धृत्वा षोडशमात्राभिरेच
येत् तदुक्तं तत्रैव वामेन नासारंध्रेण पूरयेदमृतात्मना स्मरंश्च भुमरुत्पश्चाद्दक्षिणेनापसारयेत्
एवं समाधितेपश्चाद्द्वात्रिंशन्मात्रया हरेत् धारयेच्च चतुःषष्ट्या रेचयेत्तु तुरीयत इति मरुत् मरु
तमित्यर्थः श्रीविद्याप्राणायामेऽग्निसूर्यसोमात्मकविद्याखंडत्रयं मूलाधारहृदयद्वादशा

२

2

तेषु ध्यायेदिति ज्ञेयं मूलविद्ययापि प्राणायामं कुर्यात् इति संप्रदायः ततः ॐ ह्रीं सर्ववि
घ्नकृद्भ्यः सर्वभूतेभ्यो हूं स्वाहा इति पुष्पाक्षताञ्जनसहितं बलिं दत्वा स्वमूर्ध्नि गन्धपुष्पा
क्षतैस्त्रिविधनाथान्संपूज्य पूर्वोक्तस्तोत्रेण स्तुत्वा तेनानाथं देव्यात्मानं विभाव्य ताद्वादश
श्लोकैः स्तुवीत पूजावसाने चेत्युक्तेः तत्स्तोत्रं यथा गणेशग्रहनक्षत्रयोगिनी राशिरू
पिणीं देवीं मन्त्रमयीं नौमि मातृकापीठरूपिणीं प्रणमामि महादेवीं मातृकापीठरूपि
णीं कालहल्लोहल्लोल्लोलकलनाशमकारिणीं यदक्षरैकमात्रेऽपि संसिद्धे स्पर्द्धते नरः र
वितार्क्ष्येन्दुकन्दर्पशंकरानलविष्णुभिः यदक्षरशशिज्योत्स्नामण्डितं भुवनत्रयं वन्दे सर्वे
श्वरीं देवीं महाश्रीसिद्धमातृकां यदक्षरमहासूत्रप्रोतमेतज्जगत्त्रयं ब्रह्माण्डादिकटाहा
न्तं वन्दे तां सिद्धमातृकां यदेकादशमाधारं बीजं कोणत्रयोद्भवं ब्रह्माण्डादिकटाहान्तं जगद
द्यापि दृश्यते अकचादिटतोन्नतपयशाक्षरवर्गिणीं ज्येष्ठाङ्गबाहुहृत्पृष्ठकटिपादनि
वासिनीं तामिकाराक्षरोद्धारां सारात्सारां परात्परां प्रणमामि महादेवीं परमानन्दरू
पिणीं अद्यापि यस्या जानन्ति न मनागपि देवताः केयं कस्मात्क्व केनेति स्वरूपारूप
भावनां वन्दे तामहमक्षय्यक्षराक्षररूपिणीं देवीं कुलकलोल्लोलप्रोल्लसन्तीं परां शिवां व
र्गानुक्रमयोगेन यस्यां मात्राष्टकं स्थितं वन्दे तामष्टवर्गोत्थमहासिद्ध्यष्टकेश्वरीं का
मपूर्णजकाराख्यश्रीपीठान्तर्निवासिनीं चतुराज्ञाकोशभूतां नौमि श्रीत्रिपुरामहं १२

फलंतत्रैव इतिद्वादशभिः श्लोकैस्तवनं सर्वसिद्धिकृत् देव्यास्त्वखंडरूपायास्तवनंत
वतत्यतः इतिस्तुत्वाश्रीआत्मानंतादात्म्येनध्यात्वागुरुंनत्वासंपूज्यतदाज्ञयापूजामारभेत् य
था टादिषु सुंदरंश्रीचक्रंप्रक्षालितंनिधायपूजयेत् श्रीचक्रविशेषस्तत्रैव चतुरस्रसमा
रभ्यनवचक्राण्युत्क्रमात् उन्नतोन्नतमामध्याच्चक्रस्यान्नियतेयतं त्रित्रिक्रमादुन्नतंत
तत्प्रजनंश्रियंलभेत् एकद्विषट्क्रमोन्नामः श्रियैकीर्त्यैचशस्यते नवानिसमरूपा
णिसर्वाभीष्टार्थसिद्धये रक्तेहेमतिरूप्येचताम्रेहषादिचक्रमात् कृत्वाश्रीचक्रनिर्माणं
स्थापयेत्पूजयेद्गणाति १ मथत्रिकोणं नियुतेथतनमितिथतनलोभोनरंनियतंभवतीत्यर्थः
त्रित्रिक्रमादिचतुरस्रपद्मद्वयरूपात् चतुर्दशारदशारद्वयमुन्नतं तस्मान्नवयोनिचक्र
मिति एकद्विषट्क्रमोन्नामइति चतुरस्रात्पद्मद्वयंतस्माच्चतुर्दशारादिकमित्यर्थः नवाना
तिनवेत्यर्थः तत्रान्योविशेषःफलकान्यांपट्टेभित्तौस्थापयेन्नकदाचन स्थापितंयदिलोभे
नमोहेनाज्ञानतोपिवा कुलंवित्तमपत्यंचनिर्मूलयतिसर्वथेति तत्र श्रीचक्राधारपीठस्था
ग्रमारभ्यप्रादक्षिण्येनअष्टदिक्षुमध्येचपुष्परागनीलवैडूर्यविद्रुममौक्तिकमरक
तवज्रगोमेदपद्मरागात्मकंध्यात्वा ह्रींश्रींअंआंइंईंउंऊंऋंॠंऌंॡंएंऐंओंऔंअंअः कं
खंगंघंङं चंछंजंझंञंटंठंडंढंणंतंथंदंधंनंपंफंबंभंमंयंरंलंवंशंषंसंहंलंक्षंनवरत्नदी

पायनमः इति संपूज्य पुष्परागाय नीलाय वैडूर्याय विद्रुमाय मौक्तिकाय मरक
ताय वज्राय गोमेदाय मध्ये पद्मरागाय तत्र कल्पवृक्षोद्यानं ध्यात्वा ह्रीं श्रीं कल्पवृ
क्षोद्यानायनमः ह्रीं श्रीं ऋतुभ्योनमः तत्र देवीमंडपं विभाव्य ज्ञानकर्मेंद्रियाणि पश्वरू
पाणि ध्यात्वा ह्रीं श्रीं इंद्रियाश्वेभ्योनमः इति पुरतः संपूज्य इंद्रियार्थान् दशगजरूपान्
ध्यात्वा ह्रीं श्रीं इंद्रियार्थगजेभ्योनमः इति मंडपस्य कल्पितपश्चिमद्वारे संपूज्य स्वायतन
श्रीपादक्षिणेन नवचक्रेश्वरीः संपूजयेत् यथा घटिकायाम दिनरात्रितिथिवारपक्ष
मासवर्षाख्यं नवरूपं कालं ह्रीं श्रीं कालचक्रेश्वरीशक्तिपादुकां पूजयामि संक्षोभा
दिनवमुद्रां ध्यात्वा ह्रीं श्रीं मुद्राचक्रेश्वरीशक्तिपादुकां पूजयामि नववर्गात्मकां मातृ
कां विभाव्य ह्रीं श्रीं मातृकाचक्रेश्वरीशक्तिपादुकां पूजयामि नवरत्नानि विचिंत्य
ह्रीं श्रीं नवरत्नचक्रेश्वरीशक्तिपादुकां पूजयामि नवरत्नसंबंधान्नवात्मानं देश
विचिंत्य ह्रीं श्रीं देशचक्रेश्वरीशक्तिपादुकां पूजयामि ततो गुरुं दिव्यसिद्धमानवौघोपा
धितो नवात्मानं विचिंत्य ह्रीं श्रीं गुरुचक्रेश्वरीशक्तिपादुकां पूजयामि पंचीकरणप्र
क्रियया ज्ञातृज्ञानज्ञेयनवात्मकं तत्त्वं विचिंत्य ह्रीं श्रीं तत्त्वचक्रेश्वरीशक्तिपादुकां पूज
यामि नवग्रहान् विचिंत्य ह्रीं श्रीं ग्रहचक्रेश्वरीशक्तिपादुकां पूजयामि तवर्गादि सप्त

ॐ जः प्राणरूपनवकं विचिन्त्य ह्रीं श्रीं मूर्तिचक्रेश्वरीशक्तिपादुकां पूजयामि ह्रीं श्रीं करु
णानाथ परिवाय नमः श्रीमाणिक्यमण्डपाय नमः मण्डपान्तर्निर्ऋत्यादिकोणेषु विलोमेन
ह्रीं श्रीं देशरूपिणीशक्तिपादुकां पूजयामि ह्रीं श्रीं कालरूपिणीशक्तिपादुकां पूजयामि
ह्रीं श्रीं आकाररूपिणीशक्तिपादुकां पूजयामि ह्रीं श्रीं शब्दरूपिणीशक्तिपादुकां पूजयामि
तत्र ह्रीं श्रीं संगतयोगिनीशक्तिपादुकां पूजयामि ह्रीं श्रीं समस्तगुप्तप्रकटसिद्धयोगिनीश
क्तिपादुकां पूजयामि इति देवीपीठं संपूज्य अर्घ्यं स्थापयेत् यथा स्वर्णरजतताम्रकाचमृन्म
यानामन्यतमपात्रं प्रक्षालितं साधारणं स्थापयित्वा शुद्धजलेनापूर्य गोरोचनकर्पूरकाश्मीरा
गुरुकस्तूरिकानि निक्षिप्य आधारचषकांबु निवह्निसूर्यसोमात्मकं विद्याखण्डत्रयं बुध्वा तत्र न्य
स्तद्रव्याणि पृथिव्यादिभूतात्मकानि संचिन्त्य तदुपरि धेनुमुद्रां योनिमुद्रां च प्रदर्श्य त्रंबुमध्ये
श्रीचक्रं विभाव्य तत्र वाग्वीशं वह्निनिर्ऋतिकोणेषु अग्नेरादित्रच षडंगमंत्रैरभ्यर्च्य ततः षोडश
नित्यामंत्रैरेकैकवारं श्रीविद्यातृतीयखण्डेन दशवारं मूलविद्यादिन नित्याभ्यां त्रिवारं जपित्वा
ततः पात्रान्तरेणान्यमर्घोदकमादाय तृतीयखण्डेनात्मानं योगवस्तूनि च प्रोक्षयेत् त्रिवारं त
तः मूलाधारहृदयद्वादशान्तेषु अग्निसूर्यसोमात्मकविद्याखण्डत्रयं ध्यात्वा अग्नीषोमात्मकं
प्रथमतृतीयखण्डतेजो आनन्दमध्यमखण्डं ध्यात्वा मध्यखण्डतेजोभिर्मण्डमेखला दिनेविवि
त्वा उदयत्सूर्यसहस्राभं मूलादिब्रह्मरन्ध्रान्तं व्याप्यानवच्छिन्नं स्थितं ज्योतिर्विभाव्य तत्र जः ।

मात्रकृणिनं स्वशरीरे विभाव्य ततोन्तर्बहिश्च तथैव विभाव्य पूर्वोक्तं प्राणायामं कृत्वा करशु
द्धिं कुर्यात् अस्या विद्यायाः दक्षिणामूर्तिर्ऋषिः पंक्तिश्छन्दः श्रीत्रिपुरसुन्दरी देवतेति स्मरण
मात्रान्न्यासमपि केचिदिच्छन्ति ततः ऐं क्लीं सौः इति वामदक्षिणकरतलकरपृष्ठयोरन्योन्य
मार्जनात् करशुद्धिं न्यासं विधाय आसनं चतुष्टयमन्त्रैः श्रीचक्रं पूजयेत् यथा ह्रीं ऐं ह्रीं क्लीं
ह्रीं सौः देव्यात्मासनाय नमः हैं ह्क्लीं ह्सौः चक्रासनाय नमः ह्सैं ह्स्क्लीं ह्सौः सर्वमन्त्रासना
य नमः ह्रीं ऐं क्लीं क्लीं ह्रीं सौः ह्रीं साध्यसिद्धासनाय नमः ततः षडङ्गन्यासः ऐं क्लीं सौः हृ
दयाय नमः प्रसारिततलेन पाणिना हृदयं स्पृशेत् तथैव शिरोपि ऐं क्लीं सौः शिरसे स्वाहा
ऐं क्लीं सौः शिखायै वषट् अङ्गुष्ठेन शिखां ऐं क्लीं सौः नेत्रत्रयाय वौषट् तर्जनीमध्यमा
नामिकाभिः ॥ ऐं क्लीं सौः अस्त्राय फडिति सशब्दं तालत्रयेणोर्ध्वं कृत्वा तर्जन्यङ्गुष्ठयोगेन
छोटिकाभिः दिक्षु विदिक्षु उपरि अधो मध्ये च बध्वा त्रिकुलवालपातालत्रयं कुर्यादित्यन्ये
ततो वाग्देवतान्यासः यथा अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः ब्लूं वशिनी वाग्देव
तायै नमः ब्रह्मरन्ध्रे कं खं गं घं ङं क्ल्ह्रीं कामेश्वरी वाग्देवतायै नमः भाले चं छं जं झं ञं न्व्
लीं मोदिनी वाग्देवतायै नमः भ्रूमध्ये टं ठं डं ढं णं य्लूं विमला वाग्देवतायै नमः गले
तं थं दं धं नं ज्म्रीं अरुणा वाग्देवतायै नमः हृदये पं फं बं भं मं ह्स्ल्व्यूं जयिनी वा
ग्देवतायै नमः नाभौ यं रं लं वं शं झ्म्र्यूं सर्वेश्वरी वाग्देवतायै नमः मूलाधारे

षं सं हं ळं क्षं क्ष्म्रीं कौलिनीवाग्देवतायै नमः हस्तद्वयेन पादयोर्मूलमारभ्य शिरोन्तं
व्यापकन्यासः इति वाग्देवतान्यासः ततः कूटन्यासः मूर्द्धादिहृदयान्तं प्रथमखण्डं हृद
यादिप्रपादान्तं द्वितीयखण्डं प्रपादादिहृदयान्तं तृतीयखण्डं विन्यस्य ततः करद्वयेन गुरू
पदिष्टप्रक्रियया समस्तविद्यया त्रिर्व्यापकन्यासं कृत्वा स्वशरीरे हृदयाकाशे लोहि
ताललितां बाणचापपाशसृणीकरैः दधानां कामराजाङ्के यन्त्रितां मुदितां स्मरेत्
बाणचापपाशसृणीरिति दक्षिणाधोहस्तमारभ्य प्रादक्षिण्येन तद्दक्षोर्ध्वान्तं अथ
ध्यानं एतच्छ्लोकार्थं सम्यग्गुरुतोऽवकलय्य तथा ध्यात्वा हारहाटककटककेयूरकाञ्ची
नूपुरग्रैवेयाङ्गदमुद्रिकाभिराभरणभूषितां ध्यात्वा पुनर्गुरूपदेशतः मनसा सं
पूज्य कलारूपां ध्यात्वा गुरूपदिष्टयोगेनाभ्यर्च्य यथान्तःकरणस्थदेवतादात्म्यतया
क्षणमवस्थाप्य बाह्यपूजार्थं मन्त्रज्ञाप्य बहिरावाहयेत् यथा त्रिखण्डां मुद्रां बद्ध्वा ततः
पूर्ववत् ध्यात्वा गुरूपदेशेनोच्छ्वासपथेनैव बहिरानाय लोहितामित्यादि ध्यात्वा ह्स्
ैं ह्स्कल्रीं ह्स्रौः नमः इति विद्यया अग्रस्थचक्रमध्यस्थयोनिमध्ये निवे
शयन्तां तथाविधां साधारणां ध्यात्वा मुद्राः प्रदर्शयेत् आवाहनं नाम परिच्छिन्नाया वेदन
णं ततस्तृतीयखण्डेन स्थापिनी सन्निरोधिनी अवगुण्ठनी सन्निधानकरी नमस्त्रिधा

५

मुद्रां प्रदर्शयेत् द्रां इति संक्षोभमुद्रा द्रीं इति द्राविणी। क्लीं इत्याकर्षिणी। ब्लूं इति
आवेशिनी सः इति उन्मादिनी क्रों महांकुशा ह्स्खफ्रें इति खेचरी ह्सौं इति बीजमुद्रा
बाणमंत्रैर्वा तृतीयखंडेन वा बाणकोदंडमुद्रां पाशांकुशमुद्रां प्रदर्शयेत् यद्वास्या
पिता विहाय यत्न बाणमुद्रेति महादशमुद्राः प्रदर्श्य प्राणप्रतिष्ठां कृत्वा षोडशो
पचारैः पूजयेत् पंचोपचारैर्वा तत्र पाद्यार्घाचमनस्नानवसनाभरणानि च गंधपु
ष्पधूपदीपौ नैवेद्याचमनं ततः तांबूलमर्चनास्तोत्रं तर्पणं च नमस्क्रिया नैवेद्याचम
नमिति तदंगं न पृथक् तर्पणमिति क्वचित् मधुनालिकेरांबुफलद्रवैश्च यथालाभं
निवेदनं पंचोपचारास्तु गंधपुष्पधूपदीपनैवेद्यानि तत्र पुष्पांता उपचारान् विद्यातृ
तीयखंडदिननित्याभ्यां विधाय आवरणानि पूजयेत् विद्यातृतीयखंडेन कुर्यात्पूजो
पचारकान् इत्युक्तेः दिननित्यासाहित्येनाप्याज्ञयेति ततो गंधपुष्पाभ्यां गंधाक्षताभ्यां
त्रिभिर्वा देवीमभ्यर्च्य इष्टे जयिनी विमलामध्ये दिव्यसिद्धमानुषान् देवीवामभागा
दिदक्षभागांतं त्रिपंक्त्युपविष्टान् देव्या दक्षिणे देवीरूपविशेषान् ध्यात्वा ऐं श्रीं प्रका
शानंदशक्तिपादुकां पूजयामि ऐं श्रीं विमर्शानंदशक्तिपादुकां पूजयामि ऐं
श्रीं आनंदानंदशक्तिपादुकां पूजयामि दिव्यौघे ऐं श्रीं श्रीं ज्ञानानंदशक्तिपा

दुकां पूजयामि ह्रीं श्रीं श्रीसत्यानंदशक्तिपादुकां पूजयामि ह्रीं श्रीं श्रीपूर्णानंदशक्तिपा
दुकां पूजयामि सिद्धाइमे ह्रीं श्रीं स्वभावानंदशक्तिपादुकां पूजयामि ह्रीं श्रीं प्रतिभानंदश
क्तिपादुकां पूजयामि ह्रीं श्रीं सुभगानंदशक्तिपादुकां पूजयामि मानवौघाइमे ततो देव्याः स्व
मूर्तिनित्या नित्याः पंचदशापि च देवीमूर्तौ न्यसेत् तत्र द्वितीयाभिस्तत्र मध्यैकमातृ सर्वासां नित्या
नामावरणशक्तीनां ध्यानानि तत्र मध्यप्रधानदेव्यास्तु समसुल्लासात्मकत्वतः नवावरणशक्ती
नां ध्यानं देव्याः समं भवेत् कामाकर्यस्त्रादन्यत्र भूषावाणीप्रधादिकं तत्समं परमेशानि चक्र
स्थानामशेषतः इति तासां यथा ऐं सकलह्रीं नित्यक्लिन्ने मदद्रवे सौः १ कामेश्वरी नित्याश्री
पादुकां पूजयामि ऐं भगभुगे भगिनी भगोदरि भगमाले भगावहे भगगुह्ये भगयोनि भग
निपातिनि सर्वभगवशंकरि भगरूपे नित्यक्लिन्ने भगस्वरूपे सर्वाणि भगानि मे ह्यानय वर
दे रेते सुरेते भगक्लिन्ने क्लिन्नद्रवे क्लेदय द्रावय अमोघे भगविच्चे क्षुभ क्षोभय सर्वसत्त्वान् भ
गेश्वरि ऐं ब्लूं जं ब्लूं भें ब्लूं मों ब्लूं हें ब्लूं हें क्लिन्ने सर्वाणि भगानि मे वशमानय स्त्रीं हरब्लें ऐं ह्रीं भगमा
लिनी नित्याश्रीपादुकां पूजयामि ह्रीं नित्यक्लिन्ने मदद्रवे स्वाहा नित्यक्लिन्ना नित्याश्रीपादु
कां पूजयामि ॐ क्रों भ्रों क्रों झ्रों छ्रों ज्रों स्वाहा भेरुंडा नित्याश्रीपादुकां पूजयामि ॐ ह्रीं वह्निवा
सिन्यै नमः वह्निवासिनी नित्याश्रीपादुकां पूजयामि ५ ह्रीं क्लिन्ने ऐं क्रों नित्यमदद्रवे ह्रीं महा

६

6

वज्रेश्वरीनित्याश्रीपादुकांपूजयामि ६ ह्रीं शिवदूत्यै नमः दूतानित्याश्रीपादुकांपू
जयामि ॐ ह्रीं हुं खेचछे क्षः स्त्रीं हूं क्षें ह्रीं फट् त्वरितानित्याश्रीपादुकांपूजयामि ७ ऐं क्लीं
सौः कुलसुंदरीनित्याश्रीपादुकांपूजयामि ८ हसकलरडैं हसकलरडीं हसकलर
डौं श्रौं हसकलरडैः हसकलरडीं हसकलरडौः नित्यानित्याश्रीपादुकांपूजयामि ९
ह्रीं फ्रें स्त्रूं क्रौं आं क्लीं ऐं ब्लूं नित्यमदद्रवे फ्रें ह्रीं नीलपताकानित्याश्रीपादुकांपूजयामि
भ्म्र्यूं क्रौं विजयानित्याश्रीपादुकांपूजयामि स्वौं सर्वमंगलनित्याश्रीपादुकांपूजयामि
ॐ नमो भगवति ज्वालामालिनी देवदेवि सर्वभूतसंहारकारिके जातवेदसि ज्वलन्
ति ज्वल ज्वल प्रज्वल प्रज्वल ह्रीं ह्रीं हुं र र र र र र र ज्वालामालिनि हुं फट् स्वाहा ज्वाला
मालिनिनित्याश्रीपादुकांपूजयामि १४ चक्रौं चित्रानित्याश्रीपादुकांपूजयामि १५
एवं देवीमूर्तीः संपूज्य क्रमादावरणानि पूजयेत् यथा ह्रीं श्रीं अणिमासिद्धिपादुकांपू
जयामि पश्चिमद्वारशाखायां ह्रीं श्रीं लघिमासिद्धिपादुकांपूजयामि पूर्वद्वारशाखा
यां ह्रीं श्रीं महिमासिद्धिपादुकांपूजयामि वायुकोणे ह्रीं श्रीं ईशित्वसिद्धिपादुकांपूजया
मि ईशानकोणे ह्रीं श्रीं वशित्वसिद्धिपादुकांपूजयामि अग्निकोणे ह्रीं श्रीं प्राकाम्यसि
द्धिपादुकांपूजयामि निर्ऋतिकोणे ह्रीं श्रीं भुक्तिसिद्धिपादुकांपूजयामि दक्षिणद्वा

रि ह्रीं श्रीं इच्छासिद्धिपादुकां पूजयामि उत्तरद्वारे ह्रीं श्रीं रससिद्धिपादुकां पूजयामि पश्चि
मद्वारवामशाखायां ह्रीं श्रीं सर्वकामासिद्धिपादुकां पूजयामि पूर्वद्वारवामशाखायां ह्रीं श्रीं
ब्राह्मीपादुकां पूजयामि पश्चिमद्वारे ह्रीं श्रीं माहेश्वरीपादुकां पूजयामि पूर्वद्वारे ह्रीं श्रीं
कौमारीशक्तिपादुकां पूजयामि ह्रीं श्रीं वैष्णवीशक्तिपादुकां पू॰ ह्रीं श्रीं वाराहीपादुकां पू॰ ह्रीं
श्रीं इन्द्राणीपादुकां पू॰ वायव्यादिविदिक्षु ह्रीं श्रीं चामुण्डापादुकां पू॰ दक्षिणद्वारे ह्रीं श्रीं म
हालक्ष्मीपा॰ उत्तरद्वारे इति प्रथमावरणं संपूज्य समस्तविद्यामहाराज्ञी त्रिपुरा नित्यापादुकां
पू॰ इति मध्ये पुष्पाञ्जलिं दत्वा ह्रीं श्रीं एताः प्रकटयोगिन्यः त्रैलोक्यमोहने चक्रे पूजां गृह्ण
न्तु इति पुष्पाञ्जलिदानेन तां पूजां समर्प्य द्रां इति संक्षोभमुद्रां प्रदर्शयेदिति प्रथमावरणं
ततः षोडशदले देव्यग्रमारभ्य प्रादक्षिण्ये ह्रीं श्रीं अं कामाकर्षिणी नित्याकलापादु॰ ४
ह्रीं श्रीं आं बुद्ध्याकर्षिणी नित्याकलापादुकां पू॰ ह्रीं श्रीं इं अहंकाराकर्षिणी नित्याकला
पादुकां पू॰ ह्रीं श्रीं ईं शब्दाकर्षिणी नित्याकलापादुकां पू॰ ह्रीं श्रीं उं स्पर्शाकर्षिणी नित्याक
लापादु॰ ५ ह्रीं श्रीं ऊं रूपाकर्षिणी नित्याकलापादु॰ ६ ह्रीं श्रीं ऋं रसाकर्षिणी नित्यापादुः
ह्रीं श्रीं ॠं गन्धाकर्षिणी नित्याकलापादु॰ ८ ह्रीं श्रीं ऌं चित्ताकर्षिणी ९ ह्रीं श्रीं ॡं धैर्या
कर्षिणी॰ १० ह्रीं श्रीं एं स्मृत्याकर्षिणी॰ ११ ह्रीं श्रीं ऐं नामाकर्षिणी॰ १२ ह्रीं श्रीं ओं बीजाक

८ 7

र्षिणी॰ १३ ह्रीं श्रीं अं आत्माकर्षिणी॰ १४ ह्रीं श्रीं अं अमृताकर्षिणी॰ १५ ह्रीं श्रीं अः श
रीराकर्षिणीनित्यापादुकां पूजयामि १६ एवमभ्यर्च्य मूलविद्यामुक्त्वा त्रिपुरेश्वरी
नित्याकलापादुकां समर्पयामीति मध्ये देवीमभ्यर्च्य ह्रीं श्रीं एताः गुप्तयोगिन्यः स
र्वाशापूरके चक्रे पूजां गृह्णन्तु इति पूर्ववत्पूजां समर्प्य द्रीं इति द्राविणीं मुद्रां प्रदर्शये
दिति द्वितीयावरणं ततः तत्राष्टपत्रे प्रादक्षिण्येन ह्रीं श्रीं अनंगकुसुमापादुकां पूज
यामि १ ह्रीं श्रीं अनंगमेखलापा॰ २ ह्रीं श्रीं अनंगमदनापा॰ ३ ह्रीं श्रीं अनंगमदनातुरापा॰
४ कल्पितप्रागादिदिक्षु ह्रीं श्रीं अनंगरेखापा॰ ५ ह्रीं श्रीं अनंगवेगिनीपा॰ ६ ह्रीं श्रीं अ
नंगांकुशापा॰ ७ ह्रीं श्रीं अनंगमालिनीपा॰ ८ तथा वह्न्यादिकोणेषु मूलविद्यामुक्त्वा त्रि
पुरसुन्दरीनित्यापादुकां पूजयामीति मध्येऽभ्यर्च्य ह्रीं श्रीं एताः गुप्ततरयोगिन्यः सर्वसंक्षोभ
णचक्रे पूजां गृह्णन्तु इति पूर्ववदभ्यर्च्य क्लीं आकर्षिणीमुद्रां दर्शयेदिति तृतीयावरणं त
तश्चतुर्दशारे देव्यग्रकोणमारभ्य प्रादक्षिण्येन ह्रीं श्रीं सर्वसंक्षोभिणीशक्तिपादुकां पूज
यामि १ ह्रीं श्रीं सर्वविद्राविणीशक्तिपादु॰ २ ह्रीं श्रीं सर्वाकर्षिणीशक्तिपा॰ ३ ह्रीं श्रीं स
र्वाह्लादिनीशक्ति॰ ४ ह्रीं श्रीं सर्वसंमोहिनीशक्ति॰ ५ ह्रीं श्रीं सर्वस्तम्भिनीशक्ति॰ ६ ह्रीं
श्रीं सर्वजृम्भिणीशक्ति॰ ७ ह्रीं श्रीं सर्ववशंकरीशक्ति॰ ८ ह्रीं श्रीं सर्वरञ्जिनीशक्ति॰ ९

ह्रीँश्रीँसर्वोन्मादिनीशक्ति· १० ह्रीँश्रीँसर्वार्थसाधिनीशक्ति· ११ ह्रीँश्रीँसर्वसंपत्तिपूरणी
शक्ति· १२ ह्रीँश्रीँसर्वमंत्रमयीशक्ति· १३ ह्रीँश्रीँसर्वद्वंद्वक्षयंकरीशक्ति· १४ मूलविद्यामुच्चा
त्रिपुरवासिनीनित्यापाङ्कांपूजयामितिमध्येऽर्घ्यं ह्रीँ श्रीँ एताःगुप्तयोगिन्यः सर्वसौभा
ग्यदायकेचक्रेपूजांगृह्णंतुइतिप्राग्वत्समर्प्य ह्रीँ आवेशिनीमुद्रांप्रदर्शयेदितिचतुर्थाव
रणं ततदंतर्दशारेदेव्यग्रकोणमारभ्यप्रादक्षिण्येन ह्रीँश्रीँसर्वसिद्धिप्रदादेवी· १ ह्रीँ
श्रीँसर्वसंपत्प्रदादेवी· २ ह्रीँश्रीँसर्वप्रियंकरीदेवी· ३ ह्रीँश्रीँसर्वमंगलकारिणीदेवी· ४
ह्रीँश्रीँसर्वकामप्रदादेवी· ५ ह्रीँश्रीँसर्वदुःखविमोचिनीदेवी· ६ ह्रीँश्रीँसर्वमृत्युप्रशम
नीदेवी· ७ ह्रीँश्रीँसर्वविघ्ननिवारिणीदेवी· ८ ह्रीँश्रीँसर्वांगसुंदरीदेवी· ९ ह्रीँश्रीँसर्वसौ
भाग्यदायिनीदेवी· १० ततोमूलविद्यामुच्चात्रिपुराश्रीनित्यापाङ्कांपूजयामीतिमध्येसं
पूज्य ह्रीँश्रीँएताःसंप्रदाययोगिन्यः सर्वार्थसाधकेचक्रेपूजांगृह्णंतुइतिपूजांनिवेदयेत्
इतिउन्मादिनीमुद्रांप्रदर्शयेदितिपंचमावरणं ५ ततस्तदंतर्दशारेदेव्यग्रकोणमारभ्यप्र
प्रादक्षिण्येन ह्रीँश्रीँसर्वज्ञादेवी· १ ह्रीँश्रीँसर्वशक्तिदेवी· २ ह्रीँश्रीँसर्वैश्वर्यप्रदादेवी· ३ ह्रीँ
श्रीँसर्वज्ञानमयीदेवी· ४ ह्रीँश्रीँसर्वव्याधिविनाशिनीदेवी· ५ ह्रीँश्रीँसर्वाधारस्वरूपादेवी· ६
ह्रीँश्रीँसर्वपापहरादेवी· ७ ह्रीँश्रीँसर्वानंदमयीदेवी· ८ ह्रीँश्रीँसर्वरक्षास्वरूपिणीदेवी· ९

८ ४

ह्रीं श्रीं सर्वेप्सितफलप्रदा देवी ९ मूलविद्यान्तका त्रिपुरमालिनी नित्या पादुकां पूजया
मीति मध्ये संपूज्य ह्रीं श्रीं एताः कुलकौलनिगर्भयोगिन्यः सर्वरोगहरे चक्रे पूजां गृह्ण
न्त्विति भगवत्यै समर्प्य क्रों इति महांकुशमुद्रां प्रदर्शयेदिति षष्ठमावरणं ततस्त्रिकोणाष्ट
रेखाग्रकोणमारभ्य प्रदक्षिण्येन ह्रीं श्रीं अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः रब्लूं
वशिनी वाग्देवता पादुकां पूजयामि १ ह्रीं श्रीं कं खं गं घं ङं कल्ह्रीं कामेश्वरी वाग्देवता २
ह्रीं श्रीं चं छं जं झं ञं न्व्लीं मोदिनी वाग्देवता ३ ह्रीं श्रीं टं ठं डं ढं णं ह्ल्व्यूं विमला वाग्देवता ४
ह्रीं श्रीं तं थं दं धं नं ज्म्रीं अरुणा वाग्देवता ५ ह्रीं श्रीं पं फं बं भं मं ह्स्ल्व्यूं जयिनी वाग्देवता ६
ह्रीं श्रीं यं रं लं वं झ्मर्यूं सर्वेश्वरी वाग्देवता ७ ह्रीं श्रीं शं षं सं हं लं क्षं क्ष्म्रीं कौलिनी वाग्दे
वता ८ मूलविद्यान्तका त्रिपुरसिद्धा नित्या पा० इति मध्ये संपूज्य ह्रीं श्रीं एताः रहस्य
योगिन्यः सर्वरक्षाकरे चक्रे पूजां गृह्णन्त्विति भगवत्यै समर्प्य ह्स्ख्फ्रें इति खेचरीमुद्रां
प्रदर्शयेदिति सप्तमावरणं ततो मध्ययोनेरग्रमूलपार्श्वयोर्बहिरर्चयेत् पंचबाणा
न् तद्यथा चापं पाशमंकुशमीश्वरी वायादीशान्तमभितो वामावर्तेन संस्थितान् इति क्रमे
ण ततस्तु जानीत के पूजयेत् तत्र कमलरक्तकैरवकल्हारेन्दीवरसर्वजंभनबाणेभ्यो नमः
इति संपूज्य पुण्ड्रेक्षुकाण्डं धनुस्तत्र ध्यात्वा ह्रीं श्रीं धं थं सर्वसंमोहनाय धनुषे नमः स्वर्णमयो

पाशांकुशौ विभाव्य॰ ह्रीं श्रीं ह्रीं श्रां सर्ववशीकरणाय पाशाय नमः ह्रीं श्रीं क्रोः सर्वस्तंभना
यांकुशाय नमः इति पूजयेत् अत्र सर्वेषां स्थूलसूक्ष्मपरता बोध्या तत्र साकारं स्थूलरूपं मंत्रा
त्मकं सूक्ष्मं वासनात्मकं परमिति ततस्त्रिकोणे अग्रकोणमारभ्य अप्रादक्षिण्येन ह्रीं श्रीं
विद्याप्रथमखंडं कामरूपपीठे कामेश्वरी देवी श्रीपा॰ १ ह्रीं श्रीं द्वितीयखंडमन्त्रका पूर्णगिरि
पीठे वज्रेश्वरी देवी श्रीपा॰ २ ह्रीं श्रीं तृतीयखंडमन्त्रका जालंधरपीठे इति भगमालिनी देवी श्री
पा॰ ३ ततः समस्तविद्यामन्त्रार्थं त्रिपुरांबा नित्या पा॰ ४ इति मध्ये संपूज्य ह्रीं श्रीं एताः परापर
रहस्ययोगिन्यः सर्वसिद्धिमये चक्रे पूजां गृह्णंतु इत्यावाहनं संपूज्य ह्सौः इति बीजमुद्रां प्रदर्शये
दित्यष्टमावरणं ततः ह्रीं श्रीं समस्तविद्यामन्त्रकाउड्यानपीठे श्रीमहात्रिपुरसुंदरी देवी श्रीपा॰
इति संपूज्य॰ इदं सर्वं क्रमषोडशोपचारपंचोपचारयोरन्यतरेण विद्यातृतीयखंडेन दिननित्या
भ्यां संपूज्य पुनर्मूलविद्यामन्त्रकामहात्रिपुरसुंदरी नित्या इति संपूज्य ह्रीं श्रीं एता अतिरहस्य
योगिनी सर्वानंदमये चक्रे पूजां गृह्णंतु इति निवेद्य इहवाधूपदीपाद्युपचारान् विधाय द्रां
द्रीं क्लीं ब्लूं सः क्रों ह्स्ख्फ्रें ह्सौः ऐं इति स्वच्छान्वोच्चारणपूर्वकं संक्षोभादिमुद्रानवकं प्रद
र्शयेत् यां रां लां वां सां द्रां द्रीं क्लीं ब्लूं सः इति बाणमुद्रां धं धं इति धनुर्मुद्रां ह्रीं श्रों इति पाशमुद्रां
क्रों इत्यंकुशमुद्रां प्रदर्श्य आत्मानं कलारूपं ध्यात्वा गुरूपदेशतः मूलविद्यां दशवारं जपेत्

९

मुद्रादर्शनकाले मुद्रा दैवे विधेयं वा ध्येयं यथा स्थूलं रूपं प्रसिद्धं सूक्ष्मं मंत्रमयं परं रूपं त्व
लयो भूतानंगुष्ठतः क्रमात् तत्र व्यक्ता रै सर्वानादर्शनेन तत्कथ्यते तव मायावहिर्भूतस्त्व
त्प्रसादादहं वित्तानि भूतानि भौतिकानीत्यर्थः अंगुष्ठाद्यंगुलयो भूतानि भौतिकात्मनावि
भाव्य तत्तत्स्थानेन तद्विद्याद्यावद्रूपं गतिरूपं संसारं जायमानं त्वत्प्रसादादस्माद्वित
र्मुक्तः साक्षी पश्यामीति ध्यायन्नित्यर्थः ततश्चात्मानं मंत्रकलारूपं ध्यात्वा देवीं स्वाभेदे
न संपूज्य पूर्वोक्त पंचदशविद्याभिर्देवीमभ्यर्च्य पंचभूतविद्याभिरात्माष्टाक्षरेण देवी
पूजयेत् यथा अंआंपूंकंचंटंतंपंफंवं प्राणशक्तिपा· इंईंपृंखंछंठंथंफंरं देंअग्निश
क्तिपा· उंऊंगंजंडंदंवंलंलंइलाशक्तिपा· ऋंॠंघंझंढंधंभंवंसंवें वायुशक्तिपा·
ऌंॡंश्रंडंभंणंनंमंशंहंखंशक्तिपा· इत्यभ्यर्च्य ह्रीं हंसः सोहं स्वाहा इति मंत्रेणाभ्य
र्च्य ऊर्ध्वबिंदुात्मकं वज्रं अधो विंदुद्वयात्मकं कुचद्वयं चतत्कोषैः शोभनानि प्रकल्पयेत्
इति मुद्रा कार्यं सम्यग्गुरुतोऽवकलय्य देवीं स्थूलसूक्ष्मरूपाणि गुरुतोऽवबुध्य सूक्ष्म
रूपमात्मानं भेदेन ध्यात्वा मंत्रवीर्यं स्मृत्वा देव्यग्रे मंत्रार्थानुसंध्यानपरो विद्यां जपेत्
सहस्रं मंत्राणं पलः एकविंशत्सहस्रं शतं गौणः शतमुभयरूपइति तदुक्तं सहस्रं
रुत्तो देव्याः शतं तन्नदिनं जंतवा संध्यात्रये षष्टिसंख्या मंत्रका वा प्रोक्तरूपत इति अस्या

र्थः सहस्रं मुख्यः पक्षः शतमिति नित्यानि क्रमेणायक्षिणीनरूपत्वाद्भयरूपता तद्दिनज
मिति नवप्रातः षट्त्रिंशन्मध्याह्ने षोडशसायं षष्टिश्चटिकास्त्वेकैकाहमिति संभूयएक
कविंशतिषष्ट्यधिकं शतं वा पदार्थः संख्यात्रये षष्टिसंख्यामिति तद्दिनजपसंख्याप्रति
पादनान्न्वा तु संधानपर इति॰ ततो जपं समर्प्य देव्यै पुष्पांजलिं दत्वा होमं कुर्यात् विधिल
क्षणोक्तलक्षणकुंडे अथवा एकांगुलोत्सेक हस्तायामविस्तारबालुकास्थंडिले होमं प्राणा
यामं कृत्वार्घ्योदकेन कुंडं स्थंडिलं वा प्रोक्ष्य कुशैः प्रागग्रादग्रैरावर्त्त पश्चलिखेनेन त
न्मध्ये नवकोष्ठं विलिख्य अग्निमानीय क्रव्यादंश्यां तमस इति दक्षिणस्यां दिशि अग्निगारंस्यका
मूलविद्यातृतीयखंडेन तद्दिननित्याविद्याभ्यामग्निं नवकोष्ठमध्यकोष्ठे निधाय ताभ्यामे
व प्रज्वाल्य ताभ्यामग्निं परिषिच्य कुशैर्दर्भैर्वा परिस्तीर्य वह्निं देवीस्वरूपं ध्यात्वा संपूज्यार्घ्य
र्घ्योदकेनाज्यादिहोमद्रव्यं प्रोक्ष्य स्रुवेणाज्यं पालाशपत्रेणवाज्येनन अग्नेः सप्त जिह्वा
हिरण्या गगना रक्ता कृष्णा सुप्रभा अतिरिक्ता बहुरूपाभिधाः स्मृत्वा तत जिह्वासु रणपू
र्वं प्रतिजिह्वं मूलतार्तीयखंडदिनानित्याविद्याभ्यां नव नवाहुतीर्हुत्वा प्रत्येकं क्रमेण वरुण
देवताभ्य एकैकामाहुतिं हुत्वा ततो मूलविद्यया षोडशाहुतीर्हुत्वा षोडशवारं मूलविद्यां
जपित्वा ततोऽर्घ्योदकेनाग्निं पर्युक्ष्य ततो देवीं स्वमध्यमस्थज्योतिषा एकीभूतां विभाव्य

१०

10

भस्मना तिलकं संस्पर्शय परिस्तरणदर्भाग्रयैर्नोक्षिपेत् नित्यहोमद्रव्याणि आज्यमन्नं प्रा
यसं च तिलतंडुलप्रथम तद्धयं चेति संप्रोक्तान्युक्तान्येतानि नित्यक इति तद्धयेति तिलतंडु
लावित्यर्थः इह एतावान् होमविधिर्गृहमेधीये द्रव्यपूर्वस्तेन तत्स्वगृह्योक्तधर्मसामान्यतां
त्रिकहोमविध्यपेक्षा ततो देव्यै अन्नव्यंजनपूर्णां बुरूपं बलिं त्रिभिः कुरुकुल्लामंत्रैर्दद्या
त् यथा ऐं कुरुकुल्ले स्वाहा कुरुकुल्लायाः ॐ कुरुकुल्ले ह्रीः स्वाहा ऐं ॐ कुरुकुल्ले क्लीः म
म सर्वजनं वशमानय ह्रीं स्वाहा इति ततः करतलयोस्त्रिरास्फालनं कृत्वा प्रसारिततर्ज
नाद्वयाभ्यां उभयमुष्टिभ्यां ऊर्ध्वीयः स्थितिरूपा देवतायां निवेदितबलिद्रव्यद्रव्यदर्शनं का
रयित्वा हस्तौ पादौ प्रक्षाल्य पुनर्देवीचक्रं स्थापयित्वा तेनाभ्यर्च्य देवतां वितीर्णप्रसादमंगी
कृत्य पूर्ववत्कलारूपां तां विचिंत्य मूलाधारस्थं दहरादर्शां ते पुर्विधां विद्युद्रूपे विभाव्य श
रूपदिष्टमार्गेण हस्तवुक्षोंऽ इति खेचरीमुद्रां प्रदर्श्य संहारमुद्रया शक्तिं हृदमात्मन्युप
संहृत्य तां देवीं गुरुपदं प्राप्तां ततः प्रविश्यावस्थितां विभाव्य ततः करशुद्धिं षडंगवागदेवता
न्यासं कृत्वा प्राणायामं च कृत्वा पूर्वोक्तेनाप्य स्तोत्रं देवीस्तोत्रं पठित्वा आत्मानं देवीरूपं
भावयन् कृत्वा खिलकर्तव्यः सुखं विहरेत् इति काम्यनित्योक्तनित्यपूजाविधिः इति मुख्य
विधिः अथ संक्षेपतः पूजाविधिस्तत्रैव पूजाविधानदेवेशि नित्यक्रमोदितान् अश

क्रान्तं तु विस्तारे तथा पत्र प्रशस्यते अन्यथानर्थकारी स्यात्संकोचार्चनमीश्वरि द्वितिभिर्मु
ख्यमाद्यं स्याद्द्वितीयं नवयोनिषु चतुर्दशारान्तमथान्या चतुर्थ्यं शोक्तरूपता पंचमं सर्वदुःखौघनि
नाशनं वाञ्छितप्रदं तत्प्रकारं च देवेशि कुरुकुल्लार्चने मतं इति पंचप्रकारार्चा प्रोक्ता सर्वसं
स्कृद्धिदेति अस्यार्थः अनर्थकारीति अनर्थकारी विस्तृतपूजासमर्थानां संक्षिप्तार्चनं प्रस्तु
तानर्थकारीत्यर्थः आद्यं पंचतत्त्वस्थ त्रिकोणे देवीत्रयं पंचदश नित्यापेतमध्ये देवीपूजनं सं
कुचिते स्यात्पूजनं भवति केवलमध्यदेवतापूजनं वा द्वितीयं नवयोनिष्विति वाग्देवि देवि
मध्यांत द्वितीयं पूजनं भवति चतुर्दशारावधि अन्या चतुर्दशारादिमध्यान्तं तृतीयं पूजनमि
त्यर्थः चतुर्थं शोक्तं प्रोक्तरूपत इति चतुरस्रादि मध्यान्तं प्रोक्तक्रमादित्यर्थः पंचममिति कुरु
कुल्लापटले इति वराहतन्त्रे यथा ध्विमध्यगेन वल्लकेढी पेतां ललितां नित्यविनोदानंददा
यिनीं यजेदित्याद्युक्तगुणविशेषोपेतां पूजयेदिति उपसंहरति इतीति अन्योपि संक्षिप्तार्चन
र्चनप्रकारोत्रैव एकोनविंशतिपटलेभिहितः यथा बालया करांगन्यासं विधाय तथार्घ्यं
संकल्प्य अंतस्त्रिकोणद्वादशारे चक्रे तामावाह्य तृतीयखंडेन संपूज्य ॐ ह्रीं त्रिपुरसुंदरी
नित्यापादुकां पूजयामि मध्ये ॐ ह्रीं कामेश्वरी नित्यापादु श्री इत्यादि स्वस्वनामभिस्त्रिकोणाग्र
यकोणमारभ्य प्रादक्षिण्येन तथा द्वादशारे पंचदश नित्या अभ्यर्च्य ॐ कुरुकुल्ले स्वाहा इति सप्त

११

तर्प्पणं अनेन बलिं दत्वा केवलं हस्तीयं विङ्डं जपेदिति तत्रोक्तं लघुयंत्रक्रियामासां पूजां समर्थ
सिद्धिदां शृणु मनतिविस्तारां मंगलां ब्रूहि मे शिवः इति पृष्टे भगवान्देवर्षिसिद्धगंधर्वप
न्नदेवागनाश्रयां पूजां वक्ष्यामि देवि मृगाक्षि सा मनोहरां विघ्नव्याकुलसंदर्पाकरां गण्यास
पूर्वं कं अर्चनया विधाया पीठचक्रं निधाय तत इत्यादि चक्रमध्ये हृत्पद्मे भवानिं स्तोर्च्चयेत्तिमा
त्वकोणेषु प्रदक्षिणं अन्यान्येषु कोणेषु पूजयेद्द्वादशक्रमात् अग्रात्प्रदक्षिणेष्वा हुलिं
दद्याद्यथाविधि समार्चया केवलया केवलालालितां जपेदित्यायुधिधायनाममंत्राणांव
र्णसंख्यामभिधायानेन लघुप्रकारेण तेन यंत्रं सर्वार्थसिद्धिदमिति अथ संक्षेपतः पुरश्च
रणविधिः पुरश्चरणदिनेषु त्रिसंध्यं पूजनं तत्र कदलीफलगुडशर्कराज्यपायसनैवेद्यं
कर्पूरारात्रिकाच प्रतिसंध्यं पुरश्चरणं चिकीर्षुः स्वशक्त्या गुरुं संतोष्य तदुक्तया स्वगंधसलि
लैः स्नातः शुभ्रो दिनवेषवान् पूजामंडपवर्त्ती अयोगप्रलापरहितो नियताहारस्त्रीसंगवर्ज्जी
अव्याकुलचित्तः परार्ध्यौ हरणांवरस्वगन्धलेपनाभरणातिसृष्टः संध्यासु स्वस्वनित्यजपान्
तरं प्रतिसंध्यं द्वादशाधिकैकादशशतवारं विद्यां जपित्वा दत्तद्दशांशं त्रिमधुरैः पलाशपु
ष्पैः कुसुंभकुसुमैः कल्हारकुसुमैर्वा हुत्वा सकर्पूरजलेनावत् पुनः तर्प्पणं संख्यया अह
णैः स्वगंधपुष्पैरर्चनं कृत्वा देवीं संपूज्य पूजां समापयेदित्येवं त्रिसंध्यं एवं पूर्णादिपूर्णा

तेलक्षं भवति एवं पुरश्चरणं कृत्वा पुनरेतेषु हृत्संपुटस्य संतोष्य तदनुज्ञातो नित्यकर्मं संभवेत् एक
विंशतिलक्षं कृतयुगेषु पुरश्चरणं कलौ चतुर्गुणं पुरश्चरणजपसंख्यायाः स्त्रीसंगरहितं श
त्रिसिद्धिलक्षणमिति निश्चयं वनितालोभतो भोगान् न विघ्नं जायते यदि इत्युक्तेः तत्र सर्वमंत्रसा
धारणस्त्वावलिरिवितो मंत्रतंत्रप्रकाशिकाकारोक्तो जपसंख्याविधिरुच्यते यथा एकाक्षरादि
नवाक्षरान्तमंत्राणां पीडकर्त्री बीजसंज्ञा तेषु पुनरुक्तात् समसंख्यालक्षं त्रिगुणितं कृते जपेत्
तो संख्यापादार्धं त्रिपादलक्षयात् द्विचतुर्गुणं त्रेतादौ जपनीयात् दशाक्षरादिविंशत्यक्ष
रान्तानां मंत्राणां युगानुरूपमक्षरउक्तं जपः एकविंशाक्षरादिशताक्षरान्तानां मंत्राणां केव
लेक्षजपः तदर्धाक्षराणां मयुतं जपः इति अस्याः संख्यातु तातीयसमसंख्यामानेन स्यादे
व विंशतिः तेनान्येषु युगेषु स्यात्संख्या ह्यहद्विरुदीरितेति एवं कृते पुरश्चरणे मंत्रसिद्धिः इति
पुरश्चरणविधिः अथ नैमित्तिकं किं विरुच्यते तत्र नित्यार्चनरतानां नैमित्ताधिकारः नि
त्यनैमित्तिकर्वोरत्नानां काम्यतत्रकं नित्यनैमित्तिकं काम्यं सापेक्षपूर्वतः अन्यथा भजते च
क्षन्न करोत्यापात्परं परामिति तत्र चैत्रे दमनार्चनं चतुर्दश्यां दमनं समूलशाखां वा आनी
य विद्याशान्तिते पात्रे निधाय विद्यया अर्घ्यं पंचोपचारैरेकान्ते पूजा यष्ट्वलपवनिधायापरदि
ने नित्यपूजान्ते तेन सविशेषसंपूज्य गुरुं पूजयेदिति एवमग्रे पवित्रपूजनेषु चैत्रप्रवहणी
यां वसंतोत्सवपुष्पैरर्चनं कर्पूरकाश्मीरचंदनैरपि पूजनं कार्यं वैशाखपूर्णिमायां चंदनक

र्रकस्तूरीवासितशीतलोदकैर्वा हिमोत्थजलैर्वा पूजनं ज्येष्ठे पूर्णिमायां कदलीप
नसाम्रफलैः पूजा आषाढे पूर्णिमायां मेलाकं कोलजातीयुक्तचंदनपुष्पैरर्चनं श्रा
वणे पूर्णिमायां पवित्रैः पूजा स्वर्णरजतपट्टकार्पाससूत्राणामन्यतमेन सूत्रं त्रिगुणं त्रिगुणी
कृत्य सर्वासां षोडशांगुलषोडशसूत्रषोडशग्रंथियुतानि पवित्राणि अथवा नवांगुल
सूत्रग्रंथ्यानि अथवा देव्याः षोडशांगुलसूत्रग्रंथिनि तिस्रा पंचदशसूत्रांगुलग्रंथि
आयुधानां एवं अष्टांगुलादिकं एवं नाथानां नवांगुलादिकं कामेश्वर्यादिनामंगुला
दिवाग्देवतानामष्टांगुलादि एवं स्वास्वावच्छेदकसंख्यासमसूत्रायामग्रंथिनि पवि
त्राणि होमेत एकसूत्रग्रंथि अष्टोत्तरशतसूत्रायामग्रंथि पवित्रं शक्त्यवताराख्यं तं
हृद्धेमवलंबयेत वाराहीकुरुकुल्लादीनां मूलविद्यावत आत्मनः स्कंधादिनाभ्यंतं
एवं योगिनां योगिनीनां च सिद्धविद्या हि योगिनः क्रमज्ञशिष्याणां तन्मानेन मेड्रपर्य
कसूत्रं षट्नवत्यंगुलात्मकं एवं पवित्राणि पूर्वमधिवास्य द्वितीयदिने नित्यपूजांते तैः
पूजनं उत्सवश्चवगुरुपूजा च कर्तव्या पवित्राणामकृत्वा मासानकरणे दोषः नकुर्या
न्मानसं कार्यं यदि कुर्याद्धि नष्टपतीत्रकैः भाद्रपदे पूर्णिमायां केतकीपुष्पैरधिवासनपूर्वं
पूजनं आश्विने शुक्लप्रतिपदमारभ्य पूर्णांतं एकशतं मूलीकृत्य एकशतहृद्य्याजपः
एवमेकशतहृद्याहोमः एवं पूर्णिमायां षट्शताधिकसहस्रं होमः पूजनं च प्रत्यहं

तिमपूजाहोमांते कुमारीमानीय तस्यां देवीमावाह्य संपूज्य भूषणवस्त्रदक्षिणाभिः संतो
ष्य तस्यां देवीमात्मनि योजयेत् एवं प्रतिदिनमेकैकवृद्ध्या कुमारीपूजनं तेन पूर्णायां षोडश ते
न विद्यासिद्धिः तदुक्तं तेन विद्या भवेत्सिद्धा न्तपतिकुरुते चैक इति कार्त्तिके पूर्णायां घृतेनोद्दीपित
दीपैर्होमः मूलविद्यायाः षोडशदीपान् नित्यानां स्वस्वविद्यया पंचदशदीपान् आवृत्तिशक्तीना
मेकैकं दीपं दद्यात् यद्वा एकमध्ये अभितोऽष्टौ दीपान्निधाय पुष्पैरभ्यर्च्य विद्यया निवेदयेत् मार्ग
शीर्षे नारिकेरजलकर्पूराभ्यां माषपिष्टापूपैरर्चयेत् पौषे पूर्णायां शर्करागुडमोदकद्रव्याणि
निवेदयेत् माघे शुक्ले कृष्णे वा तिलैर्गव्यशर्करापूपादिभिः पूर्णायामर्चयेत् फाल्गुने पूर्णा
यां स्वर्णरजतपुष्पैः पद्मैराम्रफलैश्च पूजयेत् एवं तुलामेषसंक्रान्त्योः कर्कमकरयोरमावा
स्यायां स्वजन्मदिने विद्याप्राप्तिदिने गुरुजन्ममरणदिनयोः अन्तरत्रयसंपातदिने पूर्णायां यु
गादिषु अष्टमीचतुर्दश्योः सविशेषं पूजयेत् इति नैमित्तिकं अथ किंचित् काम्यं मूलाद्या
रभ्य दशद्वादशांतेषु सावरणां देवीं विभाव्य तत्तत्त्वक्रमतमेव पूजयतः शीघ्रं सर्वेष्टलाभः
तत्र पूर्णाप्रतीतो भाव्यं नान्यथा निजजन्मनक्षत्रे दशमैकैकोनविंशतिनक्षत्रेषु कुंभे सं
स्थाप्य अन्तरौषधिक्वथितजलेनापूर्य विधिवदभ्यर्च्य सहस्रमभिमंत्र्य तेनाभिषेकात्स
र्वेष्टलाभः शुक्लप्रतिपदमारभ्य पूर्णांतं पञ्चमे त्रिमधुरैः श्वेते रक्तैर्वा कल्हारैर्वा श्वेतरक्त

कुर्य्याद्देव्याः प्रतिदिनं शतं सहस्रं होमात् प्रतिमासमेवं वर्षेणावश्यमहती संपत्तिः पला
शपुष्पैर्होमान्मेधावृद्धिः बिल्वपत्रपुष्पफलस्योसमिद्धोमाद्धनलाभः अथवास्नानो
त्तुलिदाः स्रग्वीवसितगंधस्रगंवरः संपूज्य देवीं पुष्टात्मा संस्कृते हव्यवाहने सवत्सायाः
सितायागोः पयसि द्विगुणे पचेत् प्रस्थमात्रं तंदुलं शालिजं सितमेव वा सिताज्ययुतो
पेनं कृत्वा तस्मिन्पायसं कं सह गृहीत्वा पाणिना विद्योतजपित्वा शतवारकं श्रियं मे देहि देवीति
प्रोक्ता काष्ठोज्वलेनले हुत्वा समाप्य पूजां तत्तयाभुक्त्वा तत्तद्दिने मौनी तु गमयेद् द्वाभ्यां श्रि
यमाप्नोति पुष्कलं निरंतरं नित्यशः श्रेज्जुहुयाद्वेन दखेव्ययं न कदापि रमा मे चन्मद्भुताः म
त्रशक्तयः इति पाकोत्तरं घृतं तंडुलयशर्करायोगः किंतिरं प्रतिदिनं रात्रिशत्यशेया बद्ध्वा वस
चक्रपरिवारणं तो देवीसलिलमध्यगां तर्पयेत् कुसुमैः सर्व्यैः सर्वोपद्रवशांतये इत्यादि
प्रयोगाः कादिमतान्तरूपदेशतश्च बोध्याः विशेषतो भावनाध्यानं विशेषाभावनाप्रयोगा
श्च गुरुमुखतोऽवगंतव्या इदानीं रहस्यं कादिमतोक्तं नित्याकवचं लिख्यते यथा समस्ता
पन्निवृत्त्यर्थं सर्वसंपद्वाप्तये भूतप्रेतपिशाचादिपीडाशांत्यै वस्तुवाप्तये समस्तरोगनाशा
य समरे विजयाय च चौरसिंहद्वीपिगजगवयादिभयानके अरण्ये पशैलगहनेमार्गे दुर्भि
क्षकेन तथा सलिलाग्निमरुत्पीडास्वब्धौ पोतादिसंकटे प्रजप्यनित्याकवचं सकृत्सर्वतत्र

ष्यसौ सुखी जीवति निर्द्वन्द्वो निःसंपन्नो जितेन्द्रियः ॥ ॐ अथ देवि ततः कवचं वक्ष्ये तव तत्वात्मकं
येनाहमपि देहेषु देवास्त्र रक्षयामि सदा सर्वतः सर्वदात्मानं ललिता पातु सर्वदा कामेश्वरी
पुरतः पातु भगमाला त्वनन्तरं दिशं पातु सदा दक्षपार्श्वे मे पातु सर्वदा नित्यक्लिन्ना च मे दण्डा
दिशं पातु सदा मम तथैव पश्चिमं भागं रक्षेत्सा वह्निवासिनी महावज्रेश्वरी रक्षेदनन्तरादि
शं मम वामपार्श्वे सदा पातु दूती मे त्वरिता ततः पालयेत्तु दिशं चान्यां रक्षेन्मां कुलसुन्दरी
नित्या मां मूर्ध्नतः पातु साधो मे पातु सर्वदा नित्या नीलपताकाख्या विजया सर्वतश्च मां क
रोतु मे मंगलानि सर्वदा सर्वमंगला देहेन्द्रियमनःप्राणान् ज्वालामालिनी विग्रहान् पायेद
निशं चित्रा चित्तं मे पातु सर्वदा कामात्क्रोधात्तथा लोभान्मोहान्मानान्मदादपि पायान्मात्स
र्यतः शोकात्संशयात्सर्वतस्तथा स्तैमित्याच्च समुद्योगादशुभेषु तु कर्मसु अस्मात्क्रूर
चिन्तानो हिंसातश्चौर्यतस्तथा रक्षन्तु मां सर्वदा ताः कुर्वन्त्विच्छां शुभेषु च नित्याः षोडश मां पा
तु गजारूढाः स्वशक्तिभिः तथा हयसमारूढाः पातु मां सर्वतः सदा हंसारूढाश्च मां पा
तु मां तु रत्नगताश्चापि रथारूढाश्च मां पातु सर्वतः सर्वदा रणे तार्क्ष्यरूढाश्च मां पातु न
भ्या व्योमगताश्चापि भूतगाः सर्वगाः पातु मां सर्वत्र च सर्वदा भूतप्रेतपिशाचापस्माररक्ष
स्यादिकान्ग्रहान् द्रावयन्तु स्वशक्तीनां भूषणैरायुधैर्मम गजाश्वद्वीपिपंचास्यतार्क्ष्यरू

१४

14

द्याविलायुधाः असंख्याःशाक्तयोदेव्याःपान्तुमांसर्वतःसदा सायंप्रातर्जपेन्नित्यंकवचं
सर्वरक्षकं कदाचिन्नाशुभंपश्येन्नशृणोतिचमत्समः इतिनित्याकवचं रहस्यध्यानंतु
सर्वासांनित्यानांत्रैविध्यंस्थूलसूक्ष्मेतरभेदेन तत्रस्थूलमुक्तं सूक्ष्मंमंत्रमयं अन्यत्तत्रैव
यथा सूक्ष्मरूपाणिचतथाकथयामि तवानघे येनतेसाधकाःसर्वेवांछितंप्राप्नुयुःक्ष
णात् प्रोक्तेषडाधारपद्मेषुलोहितात्मैकविग्रहं॥ विभाव्यतेयोनिचयंतत्रसिद्धिंविचिं
तयेत्तेनसर्वमभीष्टंतुसमवाप्नोत्ययत्नतः पूजातर्पणहोमादिरहितंभावनेनवै परंतु
ध्यानमुदितमखंडात्मविमर्शनतः निर्वातदीपसंकाशमात्मनात्मनिरीक्षणात् स्थूले
नसाधयेत्तत्रदिष्टंसर्वंशुभाशुभं प्रोक्तक्रमेणदेवेशिसततंसाध्यसाधकौ सिद्धिस्तुसू
क्ष्मरूपेणध्यानेनसकलेप्सितं साधयेत्परूपंतुसाध्यसाधकसिद्धये इति लोहिता
त्मैकविग्रहमितिषडाधारपद्मेषु स्वात्मभेदेनलोहिततेजोनिचयंविभाव्यतत्रसाध्य
साधककर्मणांस्वरूपेणभावनयाअभीष्टसिद्धिरिति अखंडात्मविमर्शनइति कटक
मुकुटादिविभूषणेषुअनुस्यूतेनतत्तदाकारतयास्थितपरशक्तिविमर्शनइत्यर्थः अ
न्यदपितत्रैवदाडिमीकेसरप्रख्यतेजोरूपाःस्मरेत्तधियातन्मध्येसाध्यरूपंचनिजवां
छान्तरूपकं समस्तसिद्धिमाप्नोतिशुभानशुभानपि तथास्तुभसंगानस्ताद्विचिंत

पेक्षागमागमं तेनाविवक्षितिजेष्टंतत्प्रामोतिध्यानवैभयात् गमागममितिमूलादिव्रक्षरं
ध्रांतमारोहारोहणेनमर्थः अत्रसाधकसिद्धयोरेवाधिकारः मातृकादनेरौषधिभुवत्रवनहका
दरेयथातथाविजत्रवर्णौषधानिसंगृह्यते मंत्राणांसमयासंव्योगद्धिकाःकुर्यात् ता
संपूजनात्साधारणात्तदोषधिक्कथितजलाभिषेकात् तल्लेपात्तत्रदानात्तद्भस्मधारणा
त्मंत्रसिद्धिः अत्रौषधानिमूलपत्रविलोक्यानि अन्येतुसिद्धुपायाःमंत्रांतराणिमाना
र्कस्यप्रयोगाश्चमूलेविलोक्याः अत्रन्यासमर्घ्यपात्रस्थापनपूजनेषुग्रंथांतरोदितगुणोपसं
हारोनभवति अस्यतंत्रस्यानपेक्षितत्वात् तथातत्रोपक्रमेदर्शितं यथान्येषामन्योन्यसा
पेक्षाजायतेमतिविभ्रमः तस्मात्त्वंनिरपेक्षंमेतंत्रंतत्संवदप्रभो इतिदेवीप्रश्नोत्तरं स्पष्ट
कारणमतेतंत्रेपूर्णमन्यानपेक्षया इत्यादिनाअपूर्वेनान्यानपेक्षितत्वात् अतएवस्वतंत्रे
तंत्रदिदिलमवातीतरदिदमितिआचार्य्याआहुः इतिकादिमतानुसारिणीललितापू
जने निर्मेघालिखितागुरुदर्शितक्रमादिहशोधायमनोविधीयतां बालार्ककिरणा
दीप्तमाणिक्याचलसप्रभे तिसानंदमजंपूर्णंदिव्यज्योतिर्नमाम्यहं इतिकादिमता
नुसारेणललितापूजनविधिःसमाप्ता श्रीरस्तु

14

15